श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीदेवराजगुरुभिरनुगृहीता

# ॥ उत्तरदिनचर्या ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

His Holiness ***śrīmad āṇḍavan*** of ***śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ उत्तरदिनचर्या ॥

अथ गोष्ठीं गरिष्ठानामधिष्ठाय सुमेधसाम्।
वाक्यालङ्कृतिवाक्यानां व्याख्यातारं नमामि तम्॥ १ ॥

सायन्तनं ततः कृत्वा सम्यगाराधनं हरेः।
स्वैरालापैः शुभैश्श्रोतॄन्नन्दयन्तं नमामि तम्॥ २ ॥

ततः कनकपर्यङ्के तरुणद्युमणिद्युतौ।
विशालविमलश्लक्ष्णतुङ्गतूलासनोज्ज्वले॥ ३ ॥

समग्रसौरभोद्गारनिरन्तरदिगन्तरे।
सोपधाने सुखासीनं सुकुमारे वरासने॥ ४ ॥

उन्मीलत्पद्मगर्भद्युतितलमुपरि क्षीरसङ्घातगौरं
राकाचन्द्रप्रकाशप्रचुरनखमणिद्योतविद्योतमानम्।
अङ्गुल्यग्रेषु किञ्चिन्नतमतिमृदुलं रम्यजामातृयोगी
दिव्यं त्वत्पादयुग्मं दिशतु शिरसि मे देशिकेन्द्रो दयालुः॥ ५ ॥

त्वं मे बन्धुस्त्वमसि जनकस्त्वं सखा देशिकस्त्वं
विद्या वृत्तं सुकृतमतुलं वित्तमप्युत्तमं त्वम्।
आत्मा शेषी भवसि भगवन्नान्तरश्शासिता त्वं
यद्वा सर्वं वरवरमुने! यद्यदात्मानुरूपम्॥ ६ ॥

अग्रे पश्चादुपरि परितो भूतलं पार्श्वतो मे
मौळौ वक्त्रे वपुषि सकले मानसाम्भोरुहे च।
दर्शंदर्शं वरवरमुने! दिव्यमङ्घ्रिद्वयं ते
नित्यं मज्जन्नमृतजलधौ निस्तरेयं भवाब्धिम्॥ ७ ॥

कर्माधीने वपुषि कुमतिः कल्पयन्नात्मभावं
दुःखे मग्नः किमिति सुचिरं दूयते जन्तुरेषः।

सर्वं त्यक्त्वा वरवरमुने ! सम्प्रति त्वत्प्रसादात्
दिव्यं प्राप्तुं तव पदयुगं देहि मे सुप्रभातम्॥ ८ ॥

या या वृत्तिर्मनसि मम सा जायतां संस्मृतिस्ते
यो यो जल्पस्स भवतु विभो ! नामसङ्कीर्तनं ते।
या या चेष्टा वपुषि भगवन् ! सा भवेद्वन्दनं ते
सर्वं भूयाद्वरवरमुने ! सम्यगाराधनं ते॥ ९ ॥

अपगतमदमानैरन्तिमोपायनिष्ठैः
अधिगतपरमार्थैरर्थकामानपेक्षैः।
निखिलजनसुहृद्भिर्निर्जितक्रोधलोभैः
वरवरमुनिभृत्यैरस्तु मे नित्ययोगः॥ १० ॥

इति स्तुतिनिबन्धेन सूचितस्वमनीषितान्।
भृत्यान् प्रेमार्द्रया दृष्ट्या सिञ्चन्तं चिन्तयामि तम्॥ ११ ॥

अथ भृत्याननुज्ञाप्य कृत्वा चेतश्शुभाश्रये।
शयनीयं परिष्कृत्य शयानं संस्मरामि तम्॥ १२ ॥

दिनचर्यामिमां दिव्यां रम्यजामातृयोगिनः।
भक्त्या नित्यमनुध्यायन् प्राप्नोति परमं पदम्॥ १३ ॥

॥ इति उत्तरदिनचर्या समाप्ता ॥

www.prapatti.com